श्रीरामानन्दाय नमः ।

श्रीनामतत्त्वभास्करः

प्रारम्भः ।

अतसीकुसुमश्यामं पीतवस्त्रं धनुर्द्धरम् ।
काकुत्स्थं करुणायुक्तं सीताकान्तं नमाम्यहम् ॥ १ ॥
लिख्यते विष्णुनाम्नां हि महिमाथ विशेषतः ।
तात्पर्याद्रघुनाथस्य नाममाहात्म्यपुष्टये ॥ २ ॥

अथ विष्णुनाममाहात्म्यम् ॥ १ ॥ मांडव्यस्मृतौ ॥ सुरापो ब्रह्महा स्तेयी[1] चौरो भग्नव्रतोऽशुचिः ॥ स्वाध्यायवर्जितः पापो लुब्धोनैष्कृतिकः शठः ३ अव्रती वृषली भर्त्ता कुनखी[2] सोमविक्रयी । सोऽपि मुक्तिमवाप्नोति विष्णोर्नामानुकीर्त्तनात् ॥ ४ ॥ वैष्णवचिंतामणौ ॥ श्रीनारद उवाच ॥ न देशनियमो राजन्न कालनियमस्तथा । विद्यते नात्र-संदेहो विष्णोर्नामानुकीर्त्तने ॥ ५ ॥ कालोऽस्ति यज्ञे दाने वा स्नाने कालोऽस्ति सज्जपे । विष्णुसंकीर्तने कालो नास्त्यत्र पृथिवीपते ॥ ६ ॥ इतिहासोत्तमे ॥ यन्नाम्नि कीर्त्तिते विष्णोर्यस्य पुंसो न जायते । सरोमपुलकं गात्रं सभवेत्कुलिशोपमः ॥ ७ ॥ तत्रैव ॥ नामसंकीर्त्तनं विष्णोः क्षुत्तृड्प्रस्खलितादिषु । यः करोति महाभाग तस्य तुष्यति केशवः ॥ ८ ॥

१ स्तेयी=स्वर्णस्तेयी । २ कुनखी=कुष्ठी ।

विष्णु रहस्ये—ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना। ते प्रयान्ति भयं त्यक्त्वा हरिलोकमनामयम् ॥९॥ ब्रह्मपुराणे पार्वतीं प्रति ईश्वरवाक्यम्। अनन्यगतयो मर्त्या भोगिनोऽपि परंतपे। ज्ञानवैराग्यरहिता ब्रह्मचर्यादिवर्जितः ॥ १० ॥ सर्वधर्मोज्झिता विष्णोर्नाममात्रैक जल्पकाः, सुखेन यां गतिं यान्ति न तां सर्वेऽपि धार्मिकाः ॥ ११ ॥ भविष्ये ॥ ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्यजातयः। यत्र तत्रानुकुर्वन्ति विष्णोर्नामानुकीर्त्तनम् ॥ १२ ॥ लिंगपुराणे ॥ व्रजंस्तिष्ठन्स्वपन्भुञ्जन्श्वसन् वाक्यप्रपूरणे। नामसंकीर्त्तनं विष्णोर्हेलया कलिमर्दनम् ॥ १३॥ वामनपुराणे ॥ तीर्थकोटिसहस्राणि व्रतकोटिशतानि च। तानि सर्वाण्यवाप्नोति विष्णुनामानुकीर्त्तनात् ॥ १४ ॥ विष्णुयें ये व्यतीपाता ये च दुर्नीतिसंभवाः। ते नामस्मरणाद्विष्णोर्नाशमायान्त्युपद्रवाः ॥१५॥ काशीपुराणे ॥ विष्णोर्नामैव पुंसः शमलमपनुदत्पुण्यमुत्पादयच्च ब्रह्मादिस्थानभोगाद्विरतिमथ गुरुश्रीपदद्वंद्वभक्तिम्॥ तत्त्वज्ञानंच विष्णोरिहमृतिजननभ्रान्तिबीजं च दग्ध्वा पूर्णानंदैकबोधे महति च पुरुषं स्थापयित्वा निवृत्तम्१६ वैशंपायनसंहितायाम्—सर्वधर्मबहिर्भूतः सर्वपापयुतस्तथा ॥ मुच्यते नात्र संदेहो विष्णुनामानुकीर्त्तनात् ॥ १७ ॥ आश्वलायनतंत्रे ॥ ये कीर्त्तयन्ति नामानि

विष्णोरमिततेजसः । सर्वधर्मबहिर्भूतास्ते यान्ति परमां गतिम् ॥ १८ ॥

अथ नारायणनाममाहात्म्यम् ॥ २ ॥ विष्णुधर्मोत्तरे—आर्त्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु पच्यमानाः । संकीर्त्य नारायणशब्दमात्रं प्रमुक्तदुःखाः सुखिनो भवन्ति ॥ १ ॥ विष्णुरहस्ये—हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये । नारायणाख्य-पीयूषं पिब जिह्वे निरन्तरम् ॥ २ ॥ पाद्मे-यस्तु संकीर्त्त-येन्नित्यं नारायणमनामयम् ॥ सपूतो नात्र संदेहो महापातकसंकटात् ॥ ३ ॥ तत्रैव—सकृदुच्चारयेद्य-स्तु नारायणमतन्द्रितः ॥ शुद्धांतःकरणो भूत्वा निर्वाणमधिगच्छति ॥ ४ ॥ वैष्णवे—प्रातर्निशि तथा संध्या मध्याह्नादिषु संस्मरन् ॥ नारायणमवा-प्नोति सद्यः पापक्षयान्नरः ॥ ५ ॥ श्रीभागवते—मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रं नामसंकीर्त्तनं तव ॥ २१ ॥ एतेनैव ह्यघो-नोऽस्य कृतं स्यादघनिष्कृतम् ॥ यदा नारायणायेति जगाद चतुरक्षरम् ॥ २२ ॥

वामनपुराणे—नारायणो नाम नरो नराणां प्रसिद्ध-चोरः कथितः पृथिव्याम् । अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मृतमात्र एव ॥ ६ ॥ बृहन्नारसिंहे—नमो नारायणायेति यस्तु कीर्त्तयते मुदा । गुरुतल्पशतेनापि

सद्यस्ते न प्रमुच्यते ॥१०॥ बृहन्नारदीये–नमो नाराय-
णायेति कीर्त्तयन्ति च ये नराः। निष्कामा वा सकामा
वा न कलिर्बाधते हि तान् ॥ ११ ॥ वह्निपुराणे–
महाव्याधिसमाछन्नो राजबाधोपपीडितः । नारा-
यणेति संकीर्त्य निरातंको भवेन्नरः ॥१२॥ नारायण-
तंत्रे–ब्रह्महा स्वर्णहारी च सुरापायी च यो नरः।
नारायणेति संकीर्त्य मुच्यते नात्र संशयः ॥ १३ ॥
अथ हरिनाममाहात्म्यम् ॥ ३ ॥ याज्ञवल्क्य-
स्मृतौ–न तावत्पापमस्तीह यन्नाम्ना न हृतं हरेः॥
अतिरेकभयादाहुः प्रायश्चित्तान्तरं बुधाः ॥ १ ॥
भारते–प्राणप्रयाणपाथेयं संसारव्याधिभेषजम् ॥
दुःखशोकपरित्राणं हरिरित्यक्षरद्वयम् ॥ २ ॥ इतिहा-
सोत्तमे–नरके पच्यमानानां नराणां पापकर्मणाम् ॥
मुक्तिः संजायते यस्मान्नामसंकीर्तनाद्धरेः ॥ ३ ॥
भविष्योत्तरे–कोटिपापानि संत्येव स्वल्पानि च
बहूनि च ॥ न तानि भूयो बाधन्ते हरेर्नामानुकी-
र्त्तनात् ॥ ४ ॥ विष्णुरहस्ये–हे जिह्वे मयि निःस्नेहे
हरिं किं त्वं न भाषसे। हरीति वद कल्याणि संसा-
रार्णवनौर्हरिः ॥ ५ ॥ हरिर्हरति पापानि दुष्टचित्तै-
रपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि
पावकः ॥ ६ ॥ विष्णुधर्मे–न गंगा न गया सेतुर्न
काशी नच पुष्करम् ॥ जिह्वाग्रे वसते यस्य हरि-

रित्यक्षरद्वयम् ॥ ७ ॥ वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करे तथा । यद्दत्तं तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ८ ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अधीता तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ९ ॥ अश्वमेधादिभिर्यज्ञैर्नरमेधैः सदक्षिणैः । याजितं तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ १० ॥ गवां कोटिसहस्राणि कन्यानामयुतानि च । दत्तानि तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥ ११ ॥ असारतरसंसारसागरोत्तारकारकम् । व्यसनोत्तारकं चैव हरिरित्यक्षरद्वयम् ॥ १२ ॥ जितं तेन जितं तेन जितं तेनेति निश्चितम् । जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ १३ ॥ विरंचिसर्वस्व-नाम्नां हरेः कीर्त्तनतः प्रयाति संसारपारं दुरितौघमुक्तः । नरः समस्तं कलिदोषजन्यं पापं निहत्याशु किमत्र चित्रम् ॥ १४ ॥ ब्रह्मपुराणे-अप्यन्यचित्तः शुद्धो वा यः सदा कीर्त्तयेद्धरिम् । सोऽपि दोषक्षयान्मुक्तिं लभेच्चेदिपतिर्यथा ॥ १५ ॥ पाद्मे-कीर्त्तयेच्छ्रद्धयायुक्तो हरेर्नाम सदा नरः । सपूतो जायते नित्यं सुवर्णस्तेयपातकात् ॥ १६ ॥ बहुधा कीर्त्तितं नाम येन दुष्कृतकर्मणा । हरेर्नाम महापापसमूहात्तेन मुच्यते ॥ १७ ॥ विष्णुपुराणे-कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते । प्रायश्चित्तं तु तस्यैकं हरिसंस्मरणं परम् ॥ १८ ॥ श्रीभागवते-

नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः । अजा-
मिलोऽपि येनैव मृत्युपाशाद्विमुच्यते ॥ १९ ॥ म्रिय-
माणो हरेर्नाम गृणन्पुत्रोपचारितम् । अजामिलोऽप्य-
गाद्धाम किमु तच्छ्रद्धया गृणन् ॥ २० ॥ एवं
निर्विद्यमानानामिच्छतामकुतोभयम् । योगिनां
नृपनिर्णीतं हरेर्नामानुकीर्त्तनम् ॥ २१ ॥ अयं हि
कृतनिर्वेशो जन्मकोट्यंहसामपि । यद्व्याजहारवि-
वशो नामस्वस्त्ययनं हरेः ॥ २२ ॥ न निष्कृतै-
रुदितैर्ब्रह्मविद्भिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः ।
यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपल-
म्भकम् ॥ २३ ॥ पतितः स्खलितो भग्नः संदष्ट-
स्तप्त आहतः । हरिरित्यवशो जल्पन् पुमान्नार्हति
यातनाम् ॥ २४ ॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो
मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात्
॥ २५ ॥ लघुभागवते—ते सभाग्या मनुष्येषु
कृतार्था नृप निश्चितम् । स्मरन्ति ये स्मारयन्ति हरे-
र्नाम कलौयुगे ॥ २६ ॥ ब्रह्मवैवर्त्ते—अपि विश्वास-
घातीयस्तथा ब्राह्मणनिंदकः । कीर्तयन् हरिनामानि
पापैर्न परिभूयते ॥ २७ ॥ प्रमादादपि संस्पृष्टो यथा-
नलकणो दहेत् । तथोष्ठपुटसंस्पृष्टं हरिनाम हरेद-
घम् ॥ २८ ॥ क्व द्व्यक्षरं हरेर्नाम स्फुलिंगसदृशं ज्व-
लत् । महतां पातकानांच राशिस्तूलोपमा क्व च ॥ २९ ॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकर-

स्तेन मोक्षाय गमनं प्रति ॥ वामनपुराणे—अश्व-
मेधादिभिर्यज्ञैर्नरमेधशतैरपि । यजितं तेन येनोक्तं
हरिरित्यक्षरद्वयम् ॥ ३१ ॥ कूर्मे—कपिला कोटि
दानस्य कन्यादानायुतस्य च । यत्फलं लभते जंतु-
स्तत्फलं हरिकीर्त्तने ॥ ३२ ॥ गारुडे—महतस्तपसो
मूलं प्रसरः पुण्यसंततेः । जीवितस्य फलं स्वादु
नियतं स्मरणं हरेः ॥ ३३ ॥ ब्रह्मांडे—महापातक
युक्तोऽपि कीर्त्तयन्ननिशं हरिम् । शुद्धान्तःकरणो
भूत्वा जायते पंक्तिपावनः ॥ ३४॥ वृद्धविष्णुपुराणे-
नाम्नोऽस्ति यावती शक्तिः पापनिर्हहने हरेः तावत्कर्त्तुं
न शक्नोति पातकं पातकीजनः ॥३५॥ सर्वरोगोप-
शमनं सर्वोपद्रवनाशनम् । शान्तिदं सर्वरिष्टानां हरे-
र्नामानुकीर्त्तनम् ॥ ३६ ॥ आदित्यपुराणे—हरेः संकी-
र्त्तनं पुण्यं महापातकनाशनम् । सर्वकामप्रदं लोके
ह्यपवर्गफलप्रदम् ॥३७॥ आंगिरसपुराणे—हरेर्नामैव
नामैव नामैव शरणं मम । कलौ नास्त्येव नास्त्येव
नास्त्येव गतिरन्यथा॥३८॥ घोरे कलियुगे प्राप्ते हरिनाम-
परायणाः । समस्ताद्यौघनिर्मुक्ता यास्यन्ति परमां
गतिम् ॥३९ ॥ सकृदुच्चारयन्त्येतद्धरेर्नाम कलौयुगे ।
ते कृतार्था महात्मानस्तेषां नित्यं नमोनमः॥ ४०॥
अहोरात्रं हरेर्नाम कीर्त्तयन्ति च ये नराः । कुर्वन्ति
हरिपूजां च न कलिर्बाधते हि तान् ॥४१ ॥ हरि-
नामपरा ये च घोरे कलियुगे द्विजाः त एव कृतकृ-
त्याश्च न कलिर्बाधते हि तान् ॥ ४२॥ न्यूनाति-

रिक्तासिद्धये कलौ वेदोक्तकर्मणाम्। हरिस्मरण-
मेवात्र संपूर्णफलदायकम् ॥ ४३ ॥ अहो चित्र-
महो चित्रमहो चित्रमिदं द्विजाः। हरिनाम्नि स्थिते
लोकः संसारे वर्त्तते पुनः ॥ ४४ ॥ बौद्धायनसंहिता-
याम्--इष्टापूर्त्तानि कर्माणि सुबहूनि कृतान्यपि।
भवहेतूनि तान्येव हरेर्नाम तु मुक्तिदम् ॥ ४५ ॥
पाराशरसंहितायां सांप्रति व्यासवाक्यम्-न सांव-
व्याधिजं दुःखहेयं नान्यौषधैरपि ॥ हरिनामौषधं
पीत्वा व्याधिस्त्याज्या न संशयः॥४६॥कोटिजन्मा-
र्जितं पापमौषधैःशान्तिमेति किम्।कीर्त्तनीयं हरेर्नाम
भवव्याधेस्तदौषधम् ॥ ४७ ॥ गौतमीयतन्त्रे-
शिविराजानं प्राति नारदवाक्यम्-न तादृशं महाभाग
पापं लोकेषु विद्यते। यादृशं धरणीनाथ हरिनाम्ना
न दह्यते॥४८॥ अथ गोविंदनाममाहात्म्यम्॥४॥
विष्णुरहस्ये॥गोकोटिदानं ग्रहणेषु काले प्रयागगंगायुत-
कल्पवासः। यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्त्तेर्न
समं शतांशैः॥ १ ॥ यदभ्यर्च्य हरिं भक्त्याश्नुते
वर्षशतं नरः। फलं प्राप्नोत्यविकलः कलौ गोविन्द-
कीर्त्तनात् ॥ २ ॥ विष्णुधर्मे--गोविन्देति समुच्चार्य
पदंक्षपितकल्मषः। क्षत्रबंधुर्विनष्टात्मा गोविन्दत्वमु-
पेयिवान् ॥ ३ ॥ किं तात वेदागमशास्त्रविस्तरैस्ती-
र्थैरनेकैरपि किं प्रयोजनम्। यद्यात्मवाञ्छा स मुक्ति-
कारणं गोविन्द गोविन्द इति स्फुटं रट ॥ ४ ॥ वर्त्त-

मानं च यत्पापं यद्भूतं यद्भविष्यति । तत्सर्वं निर्दहत्याशु गोविन्दानलकीर्त्तनम् ॥ ५ ॥ अभक्ष्यभक्षणात्पापमगम्यगमनाच्च यत् । तत्सर्वं निर्दहत्याशु गोविन्दानलकीर्त्तनम् ॥ ६ ॥ गोविन्देति मुदायुक्तः कीर्तयेद्यस्त्वनन्यधीः । पावनेन च धन्येन तेनेयं पृथिवी धृता ॥ ७ ॥ वाराहे—गोविन्देति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितैः । दहते सर्वपापानि युगान्ताग्निरिवोत्थितः ॥ ८ ॥ जन्मान्तरसहस्रेषु कोटिजन्मांतरेषु यत् । गोविन्दकीर्त्तनात् पापं शतधा याति नारद ॥ ९ ॥ अभक्ष्यभक्षणात् पापमगम्यागमनाच्च यत् । नश्यते नात्र संदेहो गोविन्दस्य च कीर्त्तनात् ॥ १० ॥ गोविन्देत्युक्तिमात्रेण हेलया कालिवर्द्धनः । पापौघो विलयं याति दानमश्रोत्रिये यथा ॥ ११ ॥ गोविन्देति तथा प्रातर्मध्याह्ने वा निशागमे । कीर्त्तनात्पुण्यमाप्नोति मखकोटिशतोद्भवम् ॥ १२ ॥ गवामयुतकोटीनां कन्यानामयुतायुतैः । तीर्थकोटिसहस्राणां तुल्यं गोविन्दकीर्त्तनम् ॥ १३ ॥ तन्नास्ति कर्मजं लोके वाग्जं मानसमेव वा । यन्न क्षयते पापं कलौ गोविन्दकीर्त्तनम् ॥ १४ ॥ वाराहे—हत्यायुतं पानसहस्रमुग्रं गुर्वंगनाकोटिनिषेवनं च । स्तेयान्यसंख्यानि हरेः प्रियेण गोविन्दनाम्नानि हतानि सद्यः ॥ १५ ॥ गोविन्दनाम यः कश्चिन्नरो भवति भूतले । कीर्त्तनादेव तस्यापि पापं याति सहस्रधा ॥ १६ ॥ गारुडे—वाजपेयसहस्राणां नित्यं

फलमवाप्स्यसि। प्रातरुत्थाय भूपाल कुरु गोविन्दकी-
र्त्तनम् ॥ १७ ॥ किं करिष्यसि सांख्येन किं योगैर्नरना-
यक। मुक्तिमिच्छसि राजेन्द्र कुरु गोविन्दकीर्त्तनम् ॥ १८ ॥
अथ वासुदेवनाममाहात्म्यम् ॥ ५ ॥ विष्णुध-
र्मोत्तरे—मांगल्यं सर्वपापघ्नमायुष्यं तापशोधनम् ॥
भुक्तिमुक्तिप्रदं पुण्यं वासुदेवस्य कीर्त्तनम् ॥ १ ॥
येऽहर्निशं जगद्धातुर्वासुदेवस्य कीर्त्तनम् ॥ कुर्वन्ति
तान्नरव्याघ्र न कलिर्बाधते नरान् ॥ २ ॥ विष्णुरहस्ये-
एतदेव परं ज्ञानमेतदेव परंतपः। एतदेव परं तत्त्वं
वासुदेवस्य कीर्त्तनम् ॥ ३ ॥ साहानिस्तन्महच्छिद्रं
साचान्धजडमूकता। यन्मूहूर्त्तक्षणं वापि वासुदेवं न
चिंतयेत् ॥ ४ ॥ यत्स्वल्पमपि वा स्थूलं कुयोनिन-
रकावहम् ॥ तद्यातु प्रसमं पापं वासुदेवानुकीर्त्तनात्
॥ ५ ॥ पातंजलसंहितायाम्—पृथिवीं सस्यसंपूर्णां दत्वा
यत्फलमश्नुते। वासुदेवेति संकीर्त्य सकृत्तत्फलमश्नुते ६
अथ जगन्नाथनाममाहात्म्यम् ॥ ६ ॥ विष्णुया-
मले—जगन्नाथेति मन्नाम कीर्त्तयिष्यन्ति ये नराः।
अपराधशतं तेषां क्षमिष्ये नात्र संशयः ॥ १ ॥
वैरिंचितंत्रे—पूजयस्व जगन्नाथं सर्वतंत्रेषु गोपितम् ॥
गुह्याद्गुह्यतरं नाम कीर्त्तयस्व निरन्तरम् ॥ २ ॥
यस्तु संकीर्त्तयेन्नित्यं जगन्नाथमतन्द्रितः। विमुक्तः
सर्वपापेभ्यो मुक्तबंधः परं व्रजेत् ॥ ३ ॥ मेरुतंत्रे-
नाम्नां मुख्यतरं विष्णोर्जगन्नाथमुदीरितम् ॥ नातः

परतरं नाम त्रिषु लोकेषु गीयते ॥ ४ ॥ न गंगास्नान-
मेतादृक् न काशीगमनं तथा । जगन्नाथेति
संकीर्त्य नरः कैवल्यमाप्नुयात् ॥ ५ ॥ अथ
कृष्णनाममाहात्म्यम् ॥ ७ ॥ मांडव्यस्मृतौ-
गच्छंस्तिष्ठन् स्वपन्वापि पिबन् भुंजञ्जनस्तथा ।
कृष्ण कृष्णेति संकीर्त्य मुच्यते पापकंचुकात् ॥ १ ॥
भागवते-कलेर्दोषनिधे राजन्नस्ति ह्येको महान्
गुणः ॥ कीर्त्तनादेव कृष्णस्य मुक्तसंगः परंव्रजेत् ॥ २ ॥
संसारसर्पसंदष्ट नष्टचेष्टैकभेषजम् ॥ कृष्णेति
वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः ॥ ३ ॥ भारते-
कृष्णः कृष्णः कृष्ण इत्यन्तकाले जल्पञ्जन्तुर्जीवितं
यो जहाति । आद्यःशब्दःकल्पते तस्य मुक्त्यै व्रीडा-
नम्रौ तिष्ठतो न्यावृणस्थौ ॥ ४ ॥ कृष्णेरताः कृष्ण-
मनुस्मरन्ति रात्रौ च कृष्णं पुनरुत्थिता ये ॥ ते
भिन्नदेहाः प्रविशन्ति कृष्णं हविर्यथा मंत्रहुतं हुताग्नौ
॥ ५ ॥ मातृहा पितृहा गोघ्नो ब्रह्महा चार्यहापि च ।
श्वादः पुल्कसको वापि शुद्धयेरन् कृष्णकीर्त्तनात् ॥ ६ ॥
यत्र तत्रास्थितो वापि कृष्ण कृष्णेति कीर्तयन् ॥ सर्वपाप-
विशुद्धात्मा स गच्छेत्परमां गतिम् ॥ ७ ॥ ब्रह्मवैवर्त्ते-
इनन् ब्राह्मणमत्यन्तं कामतो वा सुरां पिबन् ॥ कृष्ण
कृष्णेत्यहोरात्रं संकीर्त्य शुचितामियात् ॥ ८ ॥ ब्रह्माण्ड-

पुराणे, श्रीकृष्णाष्टोत्तरशतनाममाहात्म्ये—सहस्र-नाम्नां पुण्यानां त्रिरावृत्या तु यत्फलम्। एकवृत्या तु कृष्णस्य नामैकं तत्प्रयच्छति ॥ १॥ इदं किरीटी संजप्य जयी पाशुपतास्त्रभाक्। कृष्णस्य प्रणभूतः सन् कृष्णं सारथिमाप्तवान् ॥ २ ॥ किमिदं बहुना शंसन्मानुषानन्दनिर्भरः । ब्रह्मानन्दमवाप्नोते कृष्णसायुज्यमाप्नुयात्॥३॥ वाराहे च, श्रीद्वारकामाहात्म्ये प्रह्लादबलिसंवादे। अतीतान् पुरुषान् सप्त भविष्यश्च चतुर्दश। नरस्तारयते सर्वान् कलौ कृष्णेति कीर्त्तनात् ॥ ४ ॥ कृष्ण कृष्णेति कृष्णेति स्वपन् जाग्रद्व्रजँस्तथा। यो जल्पति कलौ नित्यं कृष्णरूपी भवेद्धि सः ॥ ५ ॥ विष्णुधर्मे—कृष्णेति मंगलं नाम यस्य वाचि प्रवर्त्तते। भस्मी भवन्ति राजेन्द्र महापातककोटयः ॥ ६ ॥ नारसिंहे, श्रीभगवदुक्तौ-कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः ॥ जलं भित्वा यथा पद्मं नरकादुद्धराम्यहम् ॥ ७ ॥ गारुडे, पाद्मे च-संसारसर्पसंदष्ट नष्टचेष्टैकभेषजम् ॥ कृष्णेति वैष्णवं मंत्रं श्रुत्वा मुक्तो भवेन्नरः ॥ ८ ॥ प्रभासपुराणे, नारदकुशध्वजसंवादे श्रीभगवदुक्तौ--नाम्नां मुख्यतरं नाम कृष्णाख्यं मे परन्तप। प्रायश्चित्तमशेषाणां पापानां मोचकं परम्॥९॥ पाद्मे—यत्र यत्र-स्थितो वाऽपि कृष्ण कृष्णेति कीर्त्तयेत्। सर्वपाप-

विशुद्धत्मा स गच्छेत्परमां गतिम् ॥१०॥ विष्णुधर्म्मोत्तरे, श्रीकृष्णसहस्रनामस्तोत्रे—वल्लवीकान्तकिन्त्वेतैस्तैरुपायैः कृष्णनामते । किंतु जिह्वाग्रगं जाग्रन्निरुद्धं हि महाभयम् ॥ ११ ॥ तत्रैवान्यत्र—सत्यं ब्रवीमि ते शंभो गोपनीयमिदं मम। मृत्युसंजीवनंनाम कृष्णाख्यमवधारय ॥१२॥ नाम चिंतामणिःकृष्णश्चैतन्यरसविग्रहः । पूर्णःशुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः॥१३॥ अतएवोक्तम्—तेभ्यो नमोऽस्तु भववारिधिजीर्णपंकसंमग्नमोक्षणविचक्षणपादुकेभ्यः। कृष्णेति वर्णयुगलश्रवणेन येषामानन्दथुर्भवति नर्त्तितरोमवृन्दः॥१४॥ अथ रामनाममाहात्म्यम्॥८॥ कल्याणानां निधानं कलिमलमथनं पावनं पावनानाम् । पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य। विश्रामस्थानमेकं कविवरवचसां जीवनं सज्जनानाम्। बीजं धर्मद्रुमस्यप्रभवतु भवतां भूतये रामनाम ॥ १ ॥ श्रीमन्नाम्नां च सर्वेषां माहात्म्येषु समेष्वपि। आधिक्यं रामनाम्नस्तु पुराणादिषु दृश्यते ॥ १ ॥ तथाहि दर्शयति पद्मे—जपतः सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति । तस्मात्कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥ २ ॥ नारदपंचरात्रे, पाद्मे च—रामे रामेति

१ अस्य पदच्छेदान्वयार्थौ—राम रामेऽति रामेऽति रमे रामे मनोरमे । सहस्रनामततुल्यं रामनाम वरानने इति ॥ हे वरानने, अहं रामे अतिरमे कथंभूते रामे, अतिरामे अतिक्रान्ता रामा येनासौ तस्मिन् शुद्धे ब्रह्मणि। पु॰ क॰ मनोरमे मनोरमयतीति तस्मिन्। कथं भूतोऽहम् । रामराः राम एव रा द्रव्यं यस्य सः यतःकारणान्मे मम सहस्रनामभिस्तुल्यं रामनाम अत इति। रमन्ते योगिनोयत्र परानन्दे चिदात्मनि। अतो रामपदेनासौ परंब्रह्माभिधीयते।

रामेति रमे रामे मनोरमे । सहस्रनामततुल्यं रामनाम वरानने ॥ ३ ॥ सहस्रनामततुल्यमिति सहस्रनाम्नां समूहः सहस्रनामतासमूहे तल् ॥ पुनः पाद्मे-विष्णोरेकैकनामानि सर्ववेदाधिकं मतम् । तादृङ्नामसहस्रेण रामनामसमं मतम् ॥ ४ ॥ अत्र सहस्रशब्दोऽनन्तवाची । यतः सर्वमंत्रेभ्यो रामनाम्नः कोटिगुणपुण्यत्वम् । पूर्वश्लोकोक्तम् ॥ तत्रैव श्रीरामेति परं नाम तारकं ब्रह्मसंज्ञकम् सहस्रनामसदृशं विष्णोर्नारायणस्य च ॥ ५ ॥ ब्रह्मवैवर्त्ते-नाम्नां सहस्रं दिव्यानां स्मरणे यत्फलं भवेत् । तत्फलं लभते नूनं रामोच्चारणमात्रतः ॥ ६ ॥ रकारादिसहस्रनाम्नि, पाद्मे च-रकारादीनि नामानि शृण्वतो मम पार्वति । मनः प्रसन्नतामेति रामनामाभिशंकया ॥ ७ ॥ इत्युक्त्वा शिवः स्वस्य परमां प्रीतिं रामनाम्नि सूचयति । यद्वा रामनाम्नोऽभिशंकया आशंकया नित्यं मम मनसः प्रीतिरानन्दो जायते संपूर्णनामकीर्त्तनस्य तु माहात्म्यं किं वक्तव्यमिति भावः । च्यवनस्मृतौ प्रायश्चित्तप्रकरणे श्रुतिस्मृतिपुराणेषु रामनामसमीरितम् । तन्नामकीर्तनं भूयस्तापत्रयविनाशनम् ॥ ८ ॥ सर्वेषामेव पापानां प्रायश्चित्तमिदं स्मृतम् । नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते ॥ ९ ॥ नामसंकीर्तनादेव तारकं ब्रह्म दृश्यते ॥ भविष्योत्तरे-कायेन मनसा वाचा

सुमहद्दुष्कृतं कृतम् । राम रामेति संकीर्त्य सद्यस्तस्माद्विमुच्यते ॥ १० ॥ नारदपंचरात्रे—नीली च वे वायवनालये वा मृत्योर्मुखे वा विशतां कुतोभीः। श्रीरामनामात्मकमंत्रविद्यासंजीवनीचेद्धृदयं प्रविष्टा ॥११॥ अन्यत्रापि-आकर्षःकृतचेतसां सुमहतामुच्चाटनं चांहसामाचांडालममूकलोकसुलभेहेतश्च मुक्तिश्रियाम्। नोदीक्षां नच दक्षिणां नच पुरश्चर्यां मनागिष्यते । मंत्रोयं रसना स्पृगेद फलति श्रीरामनामात्मकः ॥ १२॥ न श्रद्धां नापि भक्तिं नच पुनरभिधेयावधानम्नान वर्णं नाभ्यासं नाश्रमं वा नच गुरुमुदितं नापि देशादिशौ चम् । मंत्रः श्रीरामनामात्मक इह विदितोऽपेक्षते पापनुत्त्यै किंत्वेकामेव जिह्वां श्रवणयुगमपि प्राणिनामिष्टसिद्ध्यै ॥ १३ ॥ अथ सर्वसाधारणभगवन्नाममाहात्म्यमाह॥ ९॥ आदिपुराणे श्रीकृष्णार्जुनसंवादे—श्रद्धया हेलया नाम रटन्ति मम जन्तवः ॥ तेषां नाम सदा पार्थ वर्त्तते हृदये मम ॥१॥न नामसदृशं ज्ञानं न नाम सदृशं व्रतम् । न नामसदृशं ध्यानं न नामसदृशं फलम् ॥२ ॥ न नामसदृशस्त्यागो न नामसदृशः शमः। न नामसदृशं पुण्यं न नामसदृशी गतिः ॥३॥ नामैव परमा मुक्तिर्नामैव परमा गतिः। नामैव परमा शान्तिर्नामैव परमा स्थितिः॥४॥ नामैव परमा भक्तिर्नामैव

परमा मतिः। नामैव परमा प्रीतिर्नामैव परमा स्मृतिः
५॥नामैव कारणं जन्तोर्नामैव प्रभुरेव च।नामैव परमा
राध्यं नामैव परमो गुरुः ॥ ६ ॥ नामयुक्तान्जना-
न्दृष्ट्वा स्निग्धो भवति यो नरः। स याति परमं स्थानं
विष्णुना सह मोदते ॥७॥ तस्मान्नामानि कौन्तेय
भजस्व दृढमानसः । नामयुक्तः प्रियोऽस्माकं
नामयुक्तो भवार्जुन ॥ ८ ॥ श्रीभगवन्नामार्थवाद-
कल्पनादूषणम् ॥ १० ॥ कात्यायनसंहितायाम् ॥
अर्थवादं हरेर्नाम्नि संभावयति यो नरः। स पापिष्ठो
मनुष्याणां निरये पतति स्फुटम्॥१॥ ब्रह्मसंहितायां
बौधायनं प्रति श्रीभगवदुक्तौ—मन्नामकीर्त्तनफलं
विविधं निशम्य न श्रद्दधाति मनुते यदुतार्थवादम्।यो
मानुषस्तमिह दुःखचयो क्षिपामि संसारघोरविविधार्त्ति
निपीडितांगम् ॥ २ ॥ जैमिनिसंहितायां च
श्रुतिस्मृतिपुराणेषु नाममाहात्म्यवाचिषु॥ येऽर्थवाद
इति ब्रूयुर्न तेषां निरयक्षयः ॥ ३॥ तस्मिंश्च भग-
वन्नाम्नि जगदेकोपकारिणि। विश्वैकसेव्ये मतिमा-
नपराधान्विवर्जयेत्॥४॥पाद्मे-सर्वापराधकृदपि मुच्यते
हरिसंश्रयः।हरेरित्यपराधान्यः कुर्याद्द्विपदपांसनः॥५॥
नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः।नाम्नोऽपि
सर्वसुहृदो ह्यपराधात्पतत्यधः॥६॥अथनामापराधः।
सतांनिंदा नाम्नः परममपराधं वितनुते।यतः ख्यातिं यातं

कथमुसहते तद्विगर्हाम्॥ ।शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलम्। धिया भिन्नं पश्येत्स खलु हरिनामा हितकरः ॥ १॥ यतः स त्वयाति प्रसिद्धिं यातं प्रसं नाम उखेदे तेषां विगर्हां निंदां कथं सहते अपितु सोढुं न शक्नुयादेव अतोऽयमेकोऽपराधः । अस्य च मुख्यत्वादादौ निर्देशः ॥ १ ॥ गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनम्।नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः ॥२॥ अर्थवादो यस्तस्य कल्पनम् । यद्वा हरिनाम्नि अर्थवादः कल्पनमेव नतु तत्त्वतो घटते इत्यर्थः । कल्प्यते इति वा पाठः। यद्वा हरिनाम्नि कल्पनं च तन्माहात्म्यार्थपरित्यागेन दुर्बुद्ध्या वृथार्थान्तरकल्पना चेकोऽपराध इत्यर्थः ॥ नाम्नो बलात् नाम ग्रहणे न पापक्षयो भवेदिति। नाम्नां प्रभावज्ञानेन पापे बुद्धिरपि किं पुनः प्रवृत्तिः । यद्वा अकारप्रश्लेषेण नाम्नो बलं ज्ञात्वा यस्य पापे बुद्धिरित्यर्थः ॥ तस्य यमैर्बहुलव्रतादिभिरहिंसादिभिर्द्वादशभिर्वा । यद्वा बहुभिर्धर्मराजैश्चिरकालं तत्कृतयातना भोगेनापीत्यर्थः ॥ २ ॥ धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यपि प्रमादः । अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः ।शिवनामापराधः ॥ ३ ॥ चतुर्थपादे छेदोभंग आर्षः । उपजातिरीत्यावा श्रुतेऽपि नाम

माहात्म्ये यः प्रीतिरहितो नरः ॥ अहं ममादिपरमो नाम्नि सोऽप्यपराधकृत् ॥ ४॥ नाम्नि प्रीतिः श्रद्धा भक्तिर्वा तया रहितः समायः अहं ममादिपरमः। अहंता ममता च आदिशब्देन विषयभोगादिकं चैव परमं प्रधानं नतु नामग्रहणं यस्य तथाभूतः स्यात्सोऽप्य-पराधकृत् ॥ यद्वा धर्मव्रतत्याग इत्यादि श्लोकेनैक एवापराधः ॥ अहं ममादीत्यर्द्धश्लोके चास्मिन्नेकः। एवं अपराधादशये ज्ञात्वाऽपि न वर्जयन्ति सहसा नाम्नोऽपराधान् दशेति तत्रैवोक्तेः । ततश्चायमर्थः। यःप्रीतिरहितो नाम्न्येव सोऽधमः नामापराधीत्यर्थः। यद्वा योऽधमः प्रीतिरहितः सोऽपराधकृदित्युत्तरेणा-न्वयः। किंच नाम्न्येव विषये योऽहं ममतादिपरमः अहं बहुतरनामकीर्त्तक इतस्ततो नामकीर्त्तनं च मत्प्रवर्त्तितमेव मया समो नामकीर्त्तनपरोऽन्यः कः मदीय जिह्वाधीनमेव नामेत्यादिकमेव परमं प्रधानं नामकीर्त्तनं च कदाचित्सिध्यति नवा यस्य तथा भूतो यः सोपीऽति। अतएवादिष्टं भगवता। तृणादपि च नीचेन तरोरपि तितिक्षुणा। अमातिनामानन्देन

१--सतां निन्दा १ शिवस्य विष्णोश्च गुणनामादिषु भेददृष्टिः २ गुरोर-वज्ञा ३ श्रुतिशास्त्रनिन्दा ४ हरिनाम्नि अर्थवादकल्पनम् ५ नाम्नोर्बला-त्पापाचरणम् ६ धर्मव्रतादित्यागः ७ अश्रद्दधाने विमुखे चोपदेशः ८ श्रुतेऽपि नाममाहात्म्येऽप्रीतिः ९ नाम्नि अहं ममादिपरमः ॥ १० ॥ इति दश अपराधाः।

कीर्त्तनीयः सदा हरिरिति ॥ अथ नामापराधभञ्जनम् ॥
जाते नामापराधेऽपि प्रमादेन कथंचन । सदा
संकीर्त्तयन् नाम तदेकशरणो भवेत् ॥ उक्तं च तेनैव
तत्र—नामापराधयुक्तानां नामान्येव हरन्त्यघम् ॥
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥ यस्मादव-
विश्रान्तसततं प्रयुक्तानि कीर्त्तितानि सन्ति तानि नामा-
न्येवार्थकराणि सर्वप्रयोजनसंपादकानि ॥ नामैकं यस्य
वाचि श्रवणपथगतं श्रोत्रमूलं गतं वा । शुद्धं वा शुद्ध-
वर्णं व्यवहितरहितं तारयत्येव सत्यम् ॥ तच्चेद्देहद्रविण-
जनता लोभपाषंडमध्ये । निक्षिप्तं स्यान्न फलजनकं
शीघ्रमेवात्र विप्र ॥ एतदेव परिपोषयन्नामकीर्त्तने लाभ
पूजाख्यात्यर्थतां परित्याजयति नामैकमित्यादि वाचि
गतं प्रसंगाद्वाङ्मध्ये प्रवृत्तमपि श्रवणपथगतं कथंचि
न्मनःस्पृष्टमपि श्रोत्रमूलं गतं किंचिच्छ्रुतमपि शुद्धवर्णं
वा अशुद्धवर्णमपि वा व्यवहितं शब्दान्तरेण यत् व्यव-
धानं वक्ष्यमाण नारायणशब्दस्य किंचिदुच्चारणानन्तरं
प्रसंगादापतितं शब्दान्तरं तेन रहितं सत् । यद्वा
यद्यपि हलं रिक्तमित्याद्युक्तौ हकाररिकारयोर्वृत्त्या हरीति
नामास्त्येव तथा राजमहिषीत्यत्र रामनाम । एवमन्य-
दप्यूह्यम् तथापि तत्तन्नाममध्ये व्यवधायकमक्ष-
रान्तरमस्तीत्येतादृश व्यवधानरहितमित्यर्थः ॥ यद्वा
व्यवहितं च तद्रहितं चापि वा तत्र व्यवहितं
नाम्नः किंचिदुच्चारणानन्तरं कथं चिदा-

पतितं शब्दान्तरं समाधाय पश्चान्नामावशिष्टा-क्षरग्रहणमित्येवं रूपं मध्ये शब्दान्तरेणान्तरितमि-त्यर्थः । रहितं पश्चादवशिष्टाक्षरग्रहणवर्जितम् कथं चिदंशेन हीनमित्यर्थः । तथापि तारयत्येव सर्वेभ्यः पापेभ्योऽपराधेभ्यश्च संसारादप्युद्धारयत्येवेति सत्य-मेव । किन्तु नामसेवनस्य मुख्यं यत्फलं तन्न सद्यः संपद्यते यथा देहभरणाद्यर्थमपि नामसेवनेन मुख्यं फलमाशु न सिध्यतीत्याह तच्चेदि तन्नामचेद्यदि देहा-दिमध्ये निक्षिप्तं देहभरणाद्यर्थमेव विन्यस्तं तदापि फलजनकं न भवति ।किं अपि तु भवत्येव । किंतु अत्र इहलोके शीघ्रं न भवति, किंतु विलंबेनैव भवतीत्यर्थः । पुनश्च नाममाहात्म्यमाह ॥ १२ ॥पुनश्च नाममाहात्म्यं प्रोच्यते साधुतुष्टये । पुष्टये रामनाम्न-स्तु रामभद्रस्य हृष्टये ॥१ ॥ तथाहि यागो क्रिया-योगसारस्य चतुर्दशोऽध्यायः॥ श्रीवेदव्यास उवाच॥ नारायणस्य माहात्म्यं पुनर्वच्मि शृणु द्विज । यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ॥ १ ॥ विष्णुसंभूतसकलं जगदेतद्द्विजोत्तम । तस्माद्विष्णु-मयं धीराः पश्यन्ति परमार्थिनः॥ २॥ब्रह्मशंकररुद्राद्या विष्णवंशाः सकलाः सुराः । तस्मात्समस्तदेवार्चा विष्णुमेकं प्रपद्यते ॥ ३ ॥ स्मरतां विष्णुनामानि सर्वपापहराणि वै । येन केनाप्युपायेन विद्यते ना-शुभं क्वचित् ॥ ४ ॥ सर्वमेव द्विजश्रेष्ठ कर्म्मणा

पापमुच्यते । अनायासमिदं विष्णोः स्मरणं पाप-
नाशनम्॥५॥स्वपन्भुंजन् वदंस्तिष्ठन्नुत्तिष्ठंश्च व्रजंस्तथा।
स्मरेदविरतं विष्णुं मुमुक्षुर्वैष्णवो जनः॥६॥तत्त्वज्ञै-
र्मुनिभिर्नामस्मरणं कमलापतेः । न कालनियमः
प्रोक्तः सर्वदुःखविनाशनः ॥७॥ सेतिहासरामनाम-
प्रभावः ॥ १३ ॥ नामप्रभावं विप्रर्षे केशवस्य महा-
त्मनः।ब्रवीम्यहं समासेन सेतिहासं निशामय॥८॥
आसीत्सत्यवसुर्नाम पूर्वं कृतयुगे शुचिः । वैश्यो
वैश्यकुलश्रेष्ठः समस्तगुणपारगः ॥ ९ ॥ स वैश्यो
दैवयोगेन प्रथमे वयसि द्विज । जगाम वसतीं
मृत्योःकासश्वासगदार्दितः ॥ १० ॥ जीवन्ती नाम
तत्पत्नी सुमध्या नवयौवना । मृते भर्त्तरि तातस्य
जगाम निलयं ततः ॥११॥ सा जीवन्ती द्विजश्रेष्ठ
नवयौवनगर्विता । मतिं चकार जारेषु बाध्यमानापि
बांधवैः ॥ १२ ॥ व्रतस्य नियमं चापि गृहव्यापार-
मेव च । जारानुरक्तचित्ता सा तत्याज नवयौवना
॥१३॥ अन्धीकृता सा कामेन सुश्रोणी पीवरस्तनी।
धर्ममार्गं द्विजश्रेष्ठ न कदाचिद्दर्दर्श ह ॥ १४ ॥ तां
दुःशीलां ततो दृष्ट्वा तत्पिता धर्मतत्परः।अपकीर्त्ति-
भयाद्भीरुरित्याहात्यन्तकोपवान् ॥१५॥ दुष्टे पापिनि
मद्वंशे सर्वदोषविवर्जिते । आसाद्य जन्मकिमिति
क्रियते पातकं त्वया ॥१६॥ यदि ते पातकं चित्रं
हार्दं केवलमेव हि । तदा क्षिप्रं हते भाग्ये जहीहि

मम मन्दिरम् ॥१७॥ तातेनेति निरुक्ता सा क्रोधा-रुणितलोचना । पितुर्गेहं परित्यज्य सा जगाम यथासुखम् ॥ १८ ॥ अथ सा स्वेच्छया नारी भ्रमन्ती जारकांक्षया। वेश्यावृत्तिं समाश्रित्य तस्थौ लज्जाविवर्जिता ॥ १९ ॥पुलिंदशबरो वापि चांडालो वापि यो गृहम् । आयाति तस्यास्तेनापि प्रेम्णा क्रीडति सा सती ॥ २० ॥ परलोकभयं विप्र कदा-चिदपि चेतसा।न चिन्तयामास च सा वारनारी तथा क्रियाम्॥ २१ ॥ एकदा ब्राह्मणश्रेष्ठ कश्चिद्व्याधस्त-दालयम्।शुकशावं समादाय विक्रयार्थं समाययौ॥२२॥ सापि वारांगना तं च शुकशावकमुत्तमम् ।जगृहे परमप्रीत्या धनैः संपूज्य लुब्धकम् ॥ २३ ॥ तद्योग्याहारदानेन वारस्त्री नित्यमेव सा । शुकस्य पोषणं चक्रे तस्य जातकुतूहलात् ॥ २४ ॥ वारां-गनानपत्या सा तमेव शुकशावकम् । मत्वा पुत्रमि-वात्मीयं चक्रे तत्प्रतिपालनम् ॥ २५ ॥ सोऽपि पक्षी द्विजश्रेष्ठ नित्यमेव तदाज्ञया।ज्ञात्वा तच्चित्तवात्सल्या व्यवहारं करोति वै ॥२६॥ ततोऽसौ लब्धभावश्च शुको गणिकया तदा । रामेति नाम सततं पठ्यते सुन्दराक्षरम् ॥२७॥ रामनाम परंब्रह्म सर्ववेदाधिकं महत् । समस्तपातकध्वंसि स शुकश्च तदापठत्॥ २८ ॥ रामोच्चारणमात्रेण तयोश्च शुकवेश्ययोः । विनष्टमभवत्पापं सर्वमेव सुदारुणम् ॥ २९॥ कदा-

विद्वारमुख्या सा शुकोऽपि द्विजसत्तम । तावुभावपि
पंचत्वमेककाले गतौ ततः ॥ ३० ॥ समानेतुं तत-
स्तौ च विहिताखिलपातकौ ॥ किंकरान् प्रेषया-
मास चंडाद्यान्धर्म्मराट् प्रभुः ॥ ३१ ॥ ततस्ते
किंकराः सर्वे चंडाद्या अतिवेगिताः । यमाज्ञया समा-
याताः पाशमुद्गरपाणयः॥ ३२ ॥ बद्ध्वा तौ चर्मपाशेन
यमदूता भयंकराः ॥ उद्यमं चक्रिरे गन्तुं दंडिनो
निलयं प्रति ॥ ३३ ॥ तत्रान्तरे विष्णुदूताः शंख-
चक्रादिपाणयः॥ आनेतुं तौ समायाताः सर्वे विष्णु-
पराक्रमाः ॥ ३४ ॥ पाशबद्धौ ततो दृष्ट्वा पथि तौ
विष्णुकिंकराः ॥ऊचुर्वाक्यमिदं क्रुद्धा यमदूतान् दुरा-
शयान् ॥ ३५ ॥ विष्णुदूता ऊचुः॥ के यूयं विकृता-
कारा ज्वलत्पावकलोचनाः । अत्यंतदीर्घलोमानो
दंष्ट्रिणश्चर्म्मवाससः ॥ ३६ ॥ कथमेतौ महात्मानौ
विनष्टाखिलपातकौ । बद्ध्वानयथ पाशेन भवन्तः कस्य
किंकराः ॥ ३७॥ यमदूता ऊचुः॥ वैवस्वतस्य देवस्य
समाज्ञाकारिणो वयम् । नयामो भीमकर्म्माणौ यमा-
लयमिमौ जनौ ॥ ३८ ॥ यमदूतवचः श्रुत्वा ते
सर्वे विष्णुकिंकराः ॥ कोपेश्च जहसुस्तत्र बालसूर्य-
निभाननाः ॥ ३९ ॥ विष्णुदूता ऊचुः॥ अहो चित्र-
मिदं वाक्यं यमदूतमुखाच्छ्रुतम् ॥ भक्तावपि हरेरेतौ
दंड्यौ भास्करसूनुना ॥ ४० ॥ अहोचरित्रं दुष्टानां
कदाचिदपि नोत्तमम् । यत्नादपि यतो हिंसां कुर्वन्ति

सततं सताम् ॥४१॥ दुष्टानांकृतपापानां चरित्रमिद मद्भुतम्॥ निष्पापमपि पश्यन्ति स्वानुमानेन पापि-
वत् ॥ ४२ ॥ निष्पापमपि पश्यन्ति पुण्यात्मानोऽ-
खिलं जगत् ॥ पापात्मानस्तु पश्यन्ति कृतपापमि-
वाखिलम्॥४३॥श्रुत्वा पुण्यात्मनां पुण्यमतितृप्यन्ति
धर्मिणः। तृप्यन्ति पातकं श्रुत्वा पापिनां पापिनो
जनाः ॥ ४४ ॥ पापचर्चां समाकर्ण्य यथा तृप्यन्ति
पापिनः। तृप्यन्ति न तथा प्राप्य स्वर्णभारशतान्यपि
॥४५॥ अहो बलवती माया महाविष्णोर्महात्मनः।
आत्मपीडाकरमपि पापं कुर्वंति दुर्द्धियः ॥ ४६ ॥
श्रीवेदव्यास उवाच ॥ इत्युक्त्वा विष्णुदूतास्ते
विष्णुभक्तिपरायणाः॥छिन्नवन्तस्तयोर्विप्र बंधनं चक्र
धारया ॥ ४७ ॥ ततस्ते शमनप्रेष्याः क्रुद्धांगा-
रकसन्निभाः। ववृषुः सहसा तत्र ज्वलदंगारसंचयान्
॥४८॥ विष्णुदूतवचः श्रुत्वा चंडः कोपमुपागमत्।
उक्तवांश्च ततो विप्र विष्णुदूतान्महाबलान् ॥ ४६ ॥
चंड उवाच॥विहितं च मयाप्येतं शुकं वेश्यां च पापि-
नीम्। नेतुं यूयं समायाता इत्यद्भुतमिवाभवत्॥५०॥
नूनमेतौ यदा नेतुं यूयमिच्छथ सत्तमाः। तदा कुरुत
संग्राममस्माभिः सह सम्प्रति ॥५१॥ इत्युक्त्वा यम-
दूतास्ते बलिनो विधृतायुधाः॥ सिंहनादैर्दिशः सर्वाः
पूरयामासुरुद्धताः ॥ ५२ ॥ विष्णुदूता महात्मानः
स्वप्रकाशादयस्तथा ॥ शंखनादैः सुबलितैश्चक्रुः
शब्दमयं जगत् ॥ ५३ ॥ याम्यैस्ततो महा

दूतैर्धनुर्मुक्तैः शिलीमुखैः ॥ छादिता विष्णुदूतास्ते
संग्रामेऽत्यन्तदारुणे ॥ ५४ ॥ शूलानि चिक्षिपुः
केचित् शक्तीः केचिन्महाहवे ॥ केचिच्च मुद्गरास्त्राणि
केचिच्चक्राणि वै रुषा ॥ ५५ ॥ तैर्मुक्तानि महास्त्राणि
विष्णुदूताः महाभटाः ॥ सर्वाणि चूर्णयामासुर्गदा-
प्रहरणादिभिः ॥५६॥ ततो भागवतैर्दूतैर्याम्यानां चक्र-
धारया । केषांचिच्चरणाश्छिन्नाः केषांचिद्बाहवस्तथा
॥ ५७ ॥ केचिद्विच्छिन्नशिरसः केचिन्निर्भिन्नवक्षसः ।
स्रवद्रक्तोक्षिताः केचित् याम्याः पेतुर्गतासवः ॥५८॥
छिन्नैकचरणाः केचित्केचिच्छिन्नैकपाणयः ॥ संत्यज्य
सहसा याम्याः संग्रामाच्च प्रदुद्रुवुः ॥ ५९ ॥ ताना-
लोक्य ततो दूतान् पलायनपरायणान् । प्रविवेश
रुषा चंडः संग्रामं धृतमुद्गरः ॥ ६० ॥ यमदूत-
गणश्रेष्ठश्चण्डोऽत्यन्तप्रतापवान्॥ताडयामास शतशो
मुद्गरैर्विष्णुकिंकरान् ॥ ६१ ॥ अथ भागवता
दूता निशिता युधवर्षणैः ॥ ववृषुस्तरसा क्रुद्धास्तं
चंडं चंडविक्रमम् ॥ ६२ ॥ मुद्गरेण ततश्चंडो
विष्णुदूतान् पृथक् पृथक् ॥ ताडयामास विगलद्रक्तसं-
संसिक्तविग्रहः ॥ ६३ ॥ चंडेन ताडितास्तेन दूता
भागवता युधि ॥ त्यक्तसत्वाः पृष्ठभागं स्वप्रकाशस्य
वै ययुः ॥ ६४ ॥ स्वप्रकाशस्ततः क्रुद्धो जवापुष्प-
निभेक्षणः॥प्रविवेश रणं योद्धुं गदापाणिर्महाबलः॥६५॥
ताडयामास संक्रुद्धो विष्णुतुल्यपराक्रमः। मुद्गराच्चंड-

हस्तस्थात् प्रक्षज्जनभयप्रदात् ॥ ६६ ॥ समुत्तस्थौ महावह्निः सधूमप्रतिगंधिमान् ॥ समुद्गरेण चंडेन ताडिता तस्य वै गदा ॥६७॥ स्फुलिंगवर्षणं सद्यो मुमोचात्यन्तभीतिदम्॥ततः क्रोधेन चंडोऽसौ तेनैव मुद्गरेण च॥ताडयामास विप्रर्षे स्वप्रकाशं महाबलम् ॥ ६८ ॥ स्वप्रकाशस्ततो विप्र व्यथां विस्मृत्य कोपवान्॥गदया ताडयामास चंडं शमनकिंकरम्॥६९॥ तेन प्रताडितश्चंडस्तत्र रक्तपरिप्लुतः॥पपात मूर्च्छितो भूमौ बलार्के इव जैमिने ॥७०॥ यमदूतास्ततस्ते च चण्डमादाय मूर्च्छितम् ॥ हाहाकारं प्रकुर्वन्तो युद्धाद्भीताः प्रदुद्रुवुः ॥ ७१ ॥ विष्णुदूतास्ततो विप्र विष्णुरूपाः प्रहर्षिताः । जय शंखान्समादध्मुर्जैमिने द्विजसत्तम ॥ ७२ ॥ ततो रथे समारोप्य राजहंसयुते च तौ ॥ जग्मुर्विष्णुपुरं सर्वे सहसाकाशवर्त्मना ॥ ७३ ॥ विष्णुभक्तौ महात्मानौ विनष्टाखिलपातकौ ॥ प्राप्तवन्तौ महाविष्णोः सारूप्यं द्विजसत्तम ॥ ७४ ॥ यमदूतास्ततस्ते च शोणितौघपरिप्लुताः ॥ यमस्य सन्निधिं जग्मुः क्रन्दन्तो व्यथयाकुलाः ॥ ७५ ॥ तत्र गत्वा यमप्रेष्या मुक्तकेशा हतप्रभाः ॥ सूर्यपुत्रं समुद्दिश्य यदूचुस्तच्छृणु द्विज ॥ ७६ ॥ यमदूता ऊचुः ॥ सूर्यपुत्र महाबाहो तवाज्ञाकारिणो वयम् । तथापि विष्णुदूतैर्नः कृता दुर्गतिरीदृशी ॥ ७७ ॥ महा-

पातकिनां श्रेष्ठौ प्रभो यद्यपि तौ खलु ॥ रामनाम-
प्रभावेण गतो नारायणालयम् ॥ ७८ ॥ भवतो
दंडनीया ये दुरात्मानः कृतैनसः॥ तेऽपि विष्णुपुरं
याति प्रभुस्त्वन्तव किं तदा ॥ ७९ ॥ नास्माकं
विष्णुदूतौघैः कृताः परिभवा इमे ॥ तवैव केवलं
नाथ यतस्ते किंकरा वयम् ॥ ८० ॥ यम उवाच ॥
दूता यदि स्मरन्तौ तौ रामनामाक्षरद्वयम् ॥
तदा न मे दंडनीयौ तयोर्नारायणः प्रभुः ॥ ८१ ॥
संसारे नास्ति तत्पापं यद्रामस्मरणैरपि ॥ न याति
संक्षयं नूनं शृणुध्व यमकिंकराः॥८२॥ये मानवाःप्रतिदिनं
मधुसूदनस्य नामानि घोरदुरितौघविनाशकानि॥भक्त्या-
स्मरन्ति विबुधप्रवरार्चितस्य ते पापिनोऽपि च भटा
मम नैव दंड्याः ॥८३॥ गोविन्द केशव हरे जगदीश
विष्णो नारायण प्रणतवत्सल केशवेति ॥ भक्त्या
वदन्ति पुरुषाः सततं क्षितौ ये दंड्या न ते ममभटा
अपि पापिष्ठोऽपि ॥ ८४ ॥ लक्ष्मीपते सकलपाप-
विनाशकारिन् श्रीकृष्ण केशिमथनाच्युत देहि दास्यम्॥
एतद्वदन्ति सततं भुवि ये मनुष्यास्ते पापिनोऽपि
न भटा मम दंडनीयाः ॥ ८५॥ दामोदरेश्वर सुरो-
त्तमवृन्दसेव्य श्रीवासुदेव पुरुषोत्तम माधवेति। येषां
सदैव वदनेषु वसन्ति शब्दा दूता नमाम्यहमपि
प्रतिवासरं तान् ॥ ८६ ॥ नारायणस्य जगदेकपते-
र्मुरारेश्चर्चासुचित्तमतिहार्दिनृणां च येषाम् ॥ तेषामहं
सततमेव भटा अधीनो ये तु प्रफुल्लकमलेक्षणरूप-

भाजः ॥ ८७ ॥ ये विष्णुपूजनरता हरिभक्तभक्ता
एकादशीव्रतरताः कपटैर्विहीनाः॥ये विष्णुपादसलिलं
शिरसा वहन्ति दूता ह्यधीनमखिलं जगदेव तेषाम्॥८८॥
ये भुंजते भगवतो मधुसूदनस्य नैवेद्यशेषमखिलाघ-
विनाशकारि । ये कर्णयोश्च शिरसि च्छदनं तुलस्याः
नित्यं वहंति च भटाः प्रणमाम्यहं तान् ॥ ८९ ॥ ये
मातृतातचरणार्चनतत्पराश्च ये ब्राह्मणार्चनरता गुरु-
सेविनश्च ॥ ये दीनलोकहृदयातिसुखप्रदाश्च तेषामहं
सततमेव भटा ह्यधीनः ॥ ९० ॥ ये सत्यवाक्यकथ-
नेषु सदानुरक्ता लोकप्रियाश्च शरणागतपालकाश्च॥
पश्यन्ति ये च विषवत्सततं परस्वं ते मानवा मम-
भटा नहि दंडनीयाः ॥ ९१ ॥ ये चान्नदाननिरताः
सलिलप्रदाश्च भूमिप्रदा निखिललोकहितैषिणश्च॥
ये वृत्तिहीनजनवृत्तिकराः प्रशान्ता दूता न ते मम
कदापि भवन्ति दंड्याः ॥ ९२॥ ये ज्ञातिपोषणरता
प्रियवादिनश्च ये दंभकाममदमत्सरहीनचित्ताः॥ये
पापदृष्टिरहिता विजितेन्द्रियाश्च तेषामहं न विदधामि
कदापि चर्चाम् ॥ ९३ ॥ श्रीव्यास उवाच ॥ एवं
प्रबोधितास्तेन यमेन यमकिंकराः॥ ज्ञातवन्तो जग-
द्भर्त्तुः प्रभावमतुलं हरेः ॥ ९४ ॥ विष्णोर्नामानि
विप्रेन्द्र सर्ववेदाधिकानि वै ॥ तेषां मध्ये तु तत्त्वज्ञ
रामनामवरं स्मृतम् ॥ ९५॥ रामेत्यक्षरयुग्मं हि
सर्वमंत्राधिकं द्विज ॥ यदुच्चारणमात्रेण पापी याति
परां गतिम् ॥ ९६ ॥ रामनामप्रभावं हि सर्वदेवप्र-

पूजितम् ॥ महेश एव जानाति नान्यो जानाति जैमिने ॥९७॥ विष्णोर्नामसहस्राणि पठन् यल्लभते फलम्॥ तत्फलं लभते मर्त्यो रामनामस्मरन्नपि॥९८॥ अहोचित्रं मनुष्याणां चरित्रमिदमुच्यते ॥ रामेति मुक्तिदन्नाम न स्मरंति दुराशयाः ॥ ९९ ॥ अत्यन्त-दुःखलभ्यापि मुक्तिर्जगति मानवैः॥ लभ्यते रामनाम्नै-व कर्म्माहित किमतः परम् ॥१०० ॥ तावत्तिष्ठन्ति पापानि देहेषु देहिनां द्विज ॥ रामेति नाम यावद्दै न स्मरन्ति सुखप्रदम् ॥१०१॥ श्राद्धे च तर्पणे चैव बलिदाने तथोत्सवे॥ यज्ञे दाने व्रते चैव देवताराधनेऽपि च ॥ १०२ ॥ अन्येष्वपि च कार्य्येषु वैदिकेषु विचक्षणः॥ स्मरेद्यस्तत्फलं प्रेप्सू रामेति नामभक्तितः १०३ नमो रामायेति विप्र मंत्रमोंकारपूर्वकम् ॥ षडक्षरं जपे-द्यस्तु सायुज्यं प्राप्यते हरेः ॥ १०४ ॥ षडक्षरेण मंत्रेण हरिपूजनकृन्नरः ॥ सर्वान्कामानवाप्नोति प्रसा-दाच्चक्रिणः प्रभोः ॥ १०५ ॥ मृत्युकाले द्विजश्रेष्ठ रामेति नाम यः स्मरेत् ॥ स पापात्मापि परमं मो-क्षमाप्नोति जैमिने ॥ १०६ ॥ रामेति नामयात्रायां ये स्मरन्ति मनीषिणः ॥ सर्वसिद्धिर्भवेत्तेषां यात्रायां नात्र संशयः ॥१०७॥ अरण्ये प्रान्तरे वापि श्मशाने वा भयानके ॥ रामनाम स्मरेत्तस्य विद्यन्ते नापदो द्विज ॥ १०८ ॥ राजद्वारे तथा युद्धे विदेशे दस्यु-संमुखे॥ दुःस्वप्नदर्शने चैव ग्रहपीडासु जैमिने॥१०९॥ औत्पातिके भये चैव व्याधिरोगभये तथा ॥ रामनाम

स्मरन्मर्त्यो नाशुभं लभते क्वचित्॥११०॥ रामनाम द्विजश्रेष्ठ सर्वाशुभनिवारणम् ॥ कामदं मोक्षदं चैव स्मर्त्तव्यं सततं बुधैः ॥ १११॥ रामेति नाम विप्रेन्द्र यस्मिन्न स्मरति क्षणे॥क्षणः स एव व्यर्थः स्यात्सत्यमेतन्मयोच्यते ॥११२॥ रामनामामृतस्वादु भेदज्ञा रसना च या॥ तामेव रसनेत्याहुर्मुनयस्तत्त्वदर्शिनः ११३पुनश्च रामनाममहत्म्यम्१४ काशीखंडेऽपि- पेयं पेयं श्रवणपुटके रामनामाभिरामम्। ध्येयं ध्येयं मनसि सततं तारकं ब्रह्मरूपम् ॥ जल्पं जल्पं प्रकृतिविकृतौ प्राणिनां कर्णमूले।वीथ्यां वीथ्यामटति जटिलः कोऽपि काशीनिवासी ॥१॥ पुनस्तत्रैव—मुमूर्षोर्मणिकर्णिक्यामर्द्धोदकनिवासिनः ॥ ब्रह्मत्वं जानकीनाथ दिशामि तवतारकम्।२॥पुनः पाद्मे—आवां रामजगत्पूज्यौ मम पूज्यौ सदा युवाम्॥त्वन्नाम जापिनी देवी त्वन्मंत्रजपवानहम्॥३॥मुमूर्षोर्मणिकर्ण्यां तु अर्द्धोदकनिवासिनः॥ अहं दिशामि ते मंत्रं तारकं ब्रह्मदायकम् ॥ श्रीराम राम रामेति एतत्तारकमुच्यते॥४॥ब्रह्माण्डे—अहं भवन्नाम गृणन्कृतार्थो वसामि काश्यामनिशं भवान्या ॥ मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मंत्रं तव रामनाम ॥ ५ ॥ पुनस्तत्रैव वाल्मीकिवचनम्—राम त्वन्नाममहिमा वर्ण्यते केन वा कथम् ॥ यत्प्रभावादहं राम ब्रह्मर्षित्वमवाप्तवान् ॥ ३ ॥ वाराहपुराणे—दंष्ट्राच्छूकरशावकेन निहतो म्लेच्छो जराजर्जरो। हा रामेण हतोऽस्मि भूमिपतितो जल्पंस्तनुं त्यक्तवान्॥ तीर्णो

गोष्पदवद्भवार्णवमहो नाम्नः प्रभावात्पुनः। किं चित्रं यदि रामनामरसिकास्ते यान्ति रामास्पदम्॥७॥ वने च रामो वसुचाह रामो नदीस्तरामो न भयं स्मरामः॥ इति ब्रुवन्तोऽपि वने किराता मुक्तिं गताः प्रान्तपदानुषङ्गात्॥८॥ भीष्मपर्वणि-यमलोकं न पश्येत्तु नरकांस्तु कुतः पुनः॥ शृण्वन्नपि स्तुवन्नित्यं स्मरन्नपि युधिष्ठिर॥ब्रह्मरहस्ये-नियतं मम नामानि जपेद्वा कीर्त्तयेद्यदि॥महतोऽप्येनसः सत्यमुद्धरामि न संशयः॥ अगस्तिसंहितायाम्-रामरामेतिरामेति ये वदंत्यपि पापिनः॥ पापकोटिसहस्रेभ्यस्तानुद्धरति नान्यथा॥११॥ शिवसर्वस्वे-यावन्न कीर्त्तयेद्रामं कलिकल्मषसंभवम्॥ तावत्तिष्ठति देहेऽस्मिन् भयं चात्र प्रवर्त्तते॥१२॥ भार्गवीये-कोटिशो मनुजानां यद्दुरितं समुपस्थितम्।राम रामेति संकीर्त्य तन्नाशयति मानवः॥१३॥ श्रीशब्दपूर्वजयशब्दमध्ये जयद्वयान्तरित रामनामोच्चारणमाहात्म्यम्।१५॥ वशिष्ठतंत्रे-श्रीशब्दपूर्वं जयशब्दमध्ये जयद्वयानन्तरतस्तथैव॥ त्रिःसप्तकृत्वो रघुनाथनाम जपन्निहन्ति द्विजकोटिहत्याः॥१४॥रामनामोच्चारणे देशकालादि नियमाभावः॥१६॥ कात्यायनसंहितायाम्-न देशकालनियमो न शौचाशौचनिर्णयः। राम रामेति रामेति सदा सर्वत्र कीर्त्तयेत्॥१५॥ वैश्वानरसंहितायाम्-न देशकालनियमःशौचाशौच विनिर्णयः॥परं संकीर्त्तनादेव राम रामेति मुच्यते॥१६॥पुनश्च नामकीर्त्तनमा-

हात्म्यम् ॥१७॥ वैष्णवचिन्तामणौ–रामेति कीर्त्तनं
राजन्सर्वरोगनिवारणम् ।प्रायश्चित्तं हि पापानां मुक्तिदं
सर्वदेहिनाम् ।१७॥काश्यपपंचरात्रे श्रीभगवद्वाक्यम्-ये
गृणवंति निरंतरं ममपदं रामेति भक्तोत्तमा॥ग्रंतःसंतत-
जातहर्षपुलका जातप्रमोदाश्रवः ॥ ते निस्तीर्णभवा-
र्णवं सुतकलत्राद्यैस्तु नक्रैर्युतम्।तृष्णावारिसुदुस्तरेऽपि
पुनःसायुज्यमायान्त्यपि॥१८॥ दाशरथिसंहितायाम्-
नारायणानुस्मरणे दृढभक्तिः प्रजायते ॥ द्वितीयमपि
सर्वाघ भेदनं भुक्तिमुक्तिदम् ॥१९॥ श्रीरामनाम वेदेषु
सम्यग् दृष्टं महर्षिभिः॥तृतीयं वासुदेवाख्यमस्य नाम
निगद्यते॥२०॥महारामायणे-परमेश्वरनामानि सन्त्य-
नेकानि पार्वति । एकादेकं महास्वच्छमुच्चारान्मोक्ष-
दायकम्॥२१॥नाम्नामेव च सर्वेषां रामनामप्रकाश-
कम् ॥ ग्रहाणां च यथा भानुर्नक्षत्राणां यथा शशी
॥ २२॥ निर्ज्जराणां यथा शक्रो नराणां भूपतिर्यथा॥
यथा लोकेषु गोलोकः सरयूर्न्निम्नगासु च ॥ २३॥
कवीनां च यथा नागो भक्तानामञ्जनीसुतः ॥
शक्तीनां च यथा सीता रामो भगवतामपि ॥२४॥
भूधराणां यथा मेरुः सरसां सागरो यथा॥ कामधेनु-
र्गवां मध्ये धन्विनां मन्मथो यथा ॥ २५ ॥ पक्षिणां
वैनतेयश्च तीर्थानां पुष्करो यथा ॥ अहिंसा सर्व-
धर्म्माणां साधुत्वेऽपि दया यथा॥२६॥मेदिनी क्षमिणां
मध्ये मणीनां कौस्तुभो यथा॥धनुषां च यथा शार्ङ्गः खड्गा
नां नंदको यथा ॥२७॥ ज्ञानानां ब्रह्मज्ञानं च भक्तानां

प्रेमलक्षणा ॥ प्रणवः सर्वमंत्राणां रुद्राणां रुद्रमेव च ॥ २८॥ कल्पद्रुमश्च वृक्षाणां यथायोध्या पुरीषु च ॥ कर्मणां भगवत्कर्म अकारश्च स्वरेष्वपि ॥ २९ ॥ किमत्र बहुनोक्तेन सम्यग् भगवतः प्रिये॥ नाम्नां तथा च सर्वेषां रामनामपरं महत् ॥ ३० ॥ श्रीमद्रामायणीयारण्यकाण्डे भूषणाख्यातिलके गोविन्द-राजोदाहृते स्मृती—पठितसकलवेदः शास्त्रपारं गतो वा ॥ यमनियमपरो वा धर्मशास्त्रार्थकृद्वा ॥ अपि तु सकलतीर्थव्राजको वा हिताग्निर्न्नहि हृदि यदि रामः सर्वमेतद्वृथा स्यात् ॥ ३१॥ रामेति वर्णद्वयमाद-रेण सदा स्मरन्मुक्तिमुपैति जन्तुः॥ कलौयुगे कल्मष-मानसानामन्यत्र धर्मे खलु नाधिकारः ॥ ३२ ॥ भारते-ये पठन्ति नमस्यन्ति ध्यायन्ति पुरुषोत्तमम्। तान्स्पृष्ट्वा चाथ वा दृष्ट्वा नानापापैः प्रमुच्यते ॥ ३३ ॥ मार्कण्डेयपुराणे—प्रातःकाले स्मरेद्विष्णुं भोज-नं च जनार्दनम्॥ शयने पद्मनाभं च स्त्रीसंगे पुरुषो-त्तमम् ॥ १ ॥ संग्रामे चक्रपाणिश्च प्रवासे च त्रिविक्रमम् ॥ दुःस्वप्ने स्मर गोविन्दं भये च मधु-सूदनम् ॥ २ ॥ नारायणमशरणे श्रीधरं प्रियसङ्गमे ॥ जलमध्ये वराहञ्च पावके जलशायिनम्॥३॥ आयासे वामनञ्चैव सर्वसौख्येषु माधवम् ॥नारसिंहं महा-रण्ये श्रीरामं सर्वकर्म्मणि ॥ ४ ॥

इति श्रीसीतारामकृपापात्र सीतारामीय हरिहरप्रसाद-विरचितो नामतत्त्वभास्करः समाप्तः ॥

पाद्योऽन्तस्थोऽप्यनन्तं दिशति फलमसाद्द्वितीयः
द्वितीयस्तार्तीयीकःपवर्गप्रकृतिरपि बलेनापवर्गं प्रसूते।
तूर्यश्चातूर्यभाजां वितरति चतुरः श्रोत्रियाणां पुमर्थान्
रामत्वन्नामवर्णः जगति कतिपयं कौतुकं तन्वते न ॥१॥
मुक्तिस्त्रीकर्णपूरौ मुनिहृदयवयःपक्षती तीरभूमी। संसा-
रापारसिंधोः कलिकलुषतमस्तोमसोमार्कबिम्बौ। उन्मी-
लत्पुण्यपुञ्जद्रुमललितदले लोचने च श्रुतीनाम्। कामं
रामेति वर्णौ शमिह कलयतां सन्ततं सज्जनानाम् ॥२॥

नत्वा नामप्रियान् साधून् नामाराधनतत्परान्।
रामनारायणेनायं संशोध्य विशदीकृतः ॥ १ ॥

श्रीसीतया सह सदा शुभरामनाम येषां प्रियं परम-
वैष्णव सज्जनास्ते। तेषां महाह्रिपदपद्मपवित्ररेणून्मूर्ध्ना
वहामि सततं शुभप्राप्तये वै ॥१॥ ये लौकिकं हि सकलं सुवि-
हाय कृत्यं संसारतापशमने सकलेष्टदे च। श्रीरामनाम्नि
नितरां विरमन्ति सन्तः तान्वै नमामि विनमामि
नमामि नित्यम् ॥२॥

रामं श्रीजानकीशं, मनुकुलतिलकं, नागरीमोदयन्तम्।
राजन्यागर्वघातं, यजनमुनिरतं, नम्रशक्रादिदेवम्॥
दारोद्धारं जनेशं, सकलगुणगणं, नेत्रतापाः सुतीरे
शोभाढ्यं वै रमन्तं, धरणिपतिपतिं, दीनबन्धुं विवन्दे॥

इन्दुमुन्यंकचन्द्रेऽब्दे श्रीमद्विक्रमवत्सरे।
सज्जनानां सुसंमत्या सुशोध्य प्रकटीकृतः॥

इति श्रीअयोध्यान्तर्गत शृंगारभवननिवासिना श्रीभगवन्नारायणवंशोद्भव वैष्णव पं०
रामनारायणदासेन सुशोधितो नामतत्त्वभास्करः समाप्तः ॥ श्रीरस्तु ॥
श्रीसीतारामार्पणमस्तु ॥ हरिः ॐ तत्सद्ब्रह्मेति ॥ संवत् १९७१ पौषसुदी ॥